# Rishigautamaproktam Mahadevebhaktyotkarshavarnanam

# ઋષિગૌતમપ્રોક્તં મહાદેવેભક્ત્યોત્કર્ષવર્ણનમ્

## Document Information

Text title : Rishigautamaproktam Mahadevebhaktyotkarshavarnanam

File name : mahAdevebhaktyotkarShavarNanaMRRiShigautamaproktam.itx

Category : shiva, shivarahasya

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | harAkhyaH tRitIyAMshaH | pUrvArdham | adhyAyaH 40| 72-89 ||

Latest update : May 6, 2023

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

May 6, 2023

*sanskritdocuments.org*

# ઋષિગૌતમપ્રોક્તં મહાદેવેભક્ત્યોત્કર્ષવર્ણનમ્

ઘોરેણ તપસા દાનૈઃ અભ્યસ્તૈર્વિવિધૈરપિ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧॥

અભ્યસ્તોદ્ધૂલનેનાપિ યાવજ્જીવં પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૨॥

રુદ્રાક્ષધારણાભ્યાસાદ્યાવજ્જીવં પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૩॥

અન્નરાશિપ્રદાનેન યાવજ્જીવં પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૪॥

ગોકોટીનાં પ્રદાનેન શામ્ભવેભ્યઃ પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૫॥

નાનારત્નપ્રદાનેન શામ્ભવેભ્યઃ પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૬॥

દિવ્યપ્રસાદદાનેન શામ્ભવેભ્યઃ પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૭॥

સસ્યપૂર્ણમહીદાનૈઃ શામ્ભવેભ્યઃ પ્રયત્નનઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૮॥

ફલાનામપિ દાનેન શામ્ભવેભ્યઃ પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૯॥

સ્વર્ણભૂષણદાનેન શામ્ભવેભ્યઃ પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૦॥

કન્યાકોટિપ્રદાનેન શામ્ભવેભ્યઃ પ્રયત્નતઃ ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૧॥

સર્વેષ્વપિ ચ કાલેષુ મહાશામ્ભવસેવયા ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૨॥

બિલ્વવૃક્ષવનાનાં ચ કરણે શિવમન્દિરે ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૩॥

પ્રસૂનરાશિદાનેન શિવલિઙ્ગે શિવાત્મકે
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૪॥

સરોવરાણાં કરણે શ્રીમહાદેવમન્દિરે ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૫॥

તડાગવાપીનિર્માણૈઃ શ્રી મહાદેવમન્દિરે ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૬॥

દીપમાલાપ્રદાનૈશ્ચ શ્રીમહાદેવમન્દિરે ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૭॥

રમ્યહર્મ્યાદિનિર્માણૈઃ શ્રીમહાદેવમન્દિરે ।
ભવિષ્યતિ મહાદેવે ભક્તિરવ્યભિચારિણી ॥ ૧૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે ઋષિગૌતમપ્રોક્તં મહાદેવેભક્ત્યોત્કર્ષવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । હરાખ્યઃ તૃતીયાંશઃ । પૂર્વાર્ધમ્ । અધ્યાયઃ ૪૦। ૭૨-૮૯ ॥

- .. shrIshivarahasyam . harAkhyaH tRRitIyAMshaH . pUrvArdham . adhyAyaH 40. 72-89 ..

Proofread by Ruma Dewan

*Rishigautamaproktam Mahadevebhaktyotkarshavarnanam*
pdf was typeset on May 6, 2023

Please send corrections to *sanskrit@cheerful.com*